**संस्कृतवार्ता:**

**दिनाङ्क :-01.10.2024**

**प्रात: - 06:55**

## अथ वार्ताः

### जम्मू-कश्मीर विधानसभा

**जम्मू-कश्मीरे विधानसभाया: तृतीयाय अन्तिमाय च चरणाय सर्वविध-सज्जता: सम्पादिता:। शान्तिपूर्णं घटनामुक्तं च मतदानं विधातुं सुदृढ-सुरक्षाव्यवस्था: अपि सुनिश्चिता: जाता:। अद्य एतस्मिन् तृतीये चरणे सप्त-जनपदानां चत्वारिंशद्-विधानसभासनेभ्य: मतदानं समनुष्ठीयते। मतदानप्रक्रिया प्रात: सप्तवादनात् समारप्स्यते अपि च सायंकाले षड्-वादनं यावत् प्रचलिष्यति।**

**सर्वेषु मतदानकेन्द्रेषु विंशतिसहस्राधिकं मतदान-कर्मचारिण: नियुक्तास्सन्ति। कश्मीरसम्भागस्य सप्तजनपदेषु बारामूला-कुपवाड़ा-बांदीपोरा इत्येतेषु जम्मूसम्भागस्य च जम्मू-उधमपुर-कठुआ-सांबा-जनपदेषु षष्ट्यधिक-पञ्चसहस्रं मतदानकेन्द्राणि निर्मितानि। एतस्मिन् चरणे नवत्रिंशल्लक्षाधिकं मतदातार: पञ्चदशाधिक चतुश्शतं प्रत्याशिनां भाग्यनिर्णयं करिष्यन्ति।**

**ध्यातव्यम् अस्ति यत् प्रथमे चरणे एकषष्टि: प्रतिशतं द्वितीये चरणे च षड्पञ्चाशत् प्रतिशतं यावत् मतदानं समंकितम्।**

### जैमेकाप्रधानमन्त्री-भारतयात्रा

**जमैका-देशीय: प्रधानमन्त्री डॉ. एन्ड्रयू-होल्नेस् इत्येष: प्रधानमन्त्रिणा नरेन्द्रमोदिना साकं अद्य नवदिल्ल्यां प्रतिनिधि-स्तरीयां वार्तां करिष्यति। द्विपक्षीय-सहयोगं**

वर्धयितुं सहभागितापन-सन्धिपत्राणि हस्ताक्षरितानि भवितुम् अर्हन्ति। प्रधानमन्त्री एन्ड्र्यू-होल्नेस् इत्येष: राष्ट्रपतिना द्रौपदीमुर्मु-वर्यया, उपराष्ट्रपतिना जगदीपधनखडेन अन्यैः गणमान्यजनैः व्यापारोद्योग-नेतृभिः च सह सम्वादं करिष्यति। तदनु असौ श्व: वाराणसीनगरम् प्रति यास्यति। अवधेयं वर्तते यत् भारत-जमैका-देशयोः मध्ये दृढः ऐतिहासिकः सांस्कृतिकः च सम्बन्धः अस्ति। इयं यात्रा द्वैपाक्षिकबन्धान् सुदृढं करिष्यति, आर्थिकसहयोगं वर्धयिष्यति तथा च जमैका-भारतयोः मध्ये दीर्घकालिक-सम्बन्धं सुदृढं करिष्यति इति अपेक्ष्यते।

## द्रौपदी-मुर्मू- दीक्षान्तसमारोहः

राष्ट्रपतिना द्रौपदी-मुर्मु इत्यनया ह्य: नवदिल्ल्याम् अटल-बिहारी-वाजपेयी-आयुर्विज्ञान-संस्थानस्य, डॉ. राम-मनोहर-लोहिया-चिकित्सालयस्य च दशम: दीक्षान्तसमारोह: सम्बोधित:। स्वकीये संबोधने तया प्रोक्तं यत् सर्वैः इदं ध्यातव्यं यत् चिकित्सकाः रुग्णानां जीवनरक्षणे यथासंभवम् उपायान् कुर्वन्तीति, परञ्च तथापि काप्यप्रिया घटना भवेत् तदा चिकित्सकैः चिकित्सालयस्य कर्मचारिभिश्च सह दुर्व्यवहारः न भवितव्यः। सा प्रोक्तवती यत् क्रोधिताः भूत्वा यदा-कदाचित् रुग्णानां परिजनाः स्वास्थ्यकर्मिभिः सह दुर्व्यवहारं कुर्वन्ति। तेषाम् एतादृशः व्यवहारः सर्वथा निन्दनीयः अस्ति।

## मिथुन-चक्रवर्ती-फाल्केपुरस्कारः

प्रतिष्ठिताभिनेता मिथुन-चक्रवर्ती आगामि मासे सप्ततितमे राष्ट्रिय-चलच्चित्र-पुरस्कार-समारोहे दादा-साहेब-फाल्के-पुरस्कारेण सम्मानितो भविष्यति। सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः एकस्मिन् सामाजिक-संदेशपटले इमां घोषणां कुर्वन् प्रोक्तवान् यत् कोलकातानगरात् आरभ्य चलच्चित्राणां उन्नतशिखरं यावत् मिथुन-दा इत्यस्य उल्लेखनीया चलच्चित्रयात्रा समाजं प्रेरयति। सः प्रोक्तवान् यत् दादा-साहेब-फाल्के-चयन-समित्या भारतीय-चलच्चित्र-जगति तस्य लब्ध-प्रतिष्ठित-योगदानाया श्री-चक्रवर्ति-वर्याय भारतीय-चलच्चित्रस्य एषः शीर्षपुरस्कारः प्रदातुं

निर्णयः स्वीकृतः अस्ति। प्रधानमन्त्री नरेन्द्र-मोदी मिथुन-चक्रवर्तिने दादा-साहेब-फाल्के-पुरस्कारेण सम्मानितं भवितुं वर्धापनं प्रायच्छत्।

पादकन्दुक-क्रीडा

पादकन्दुकक्रीडायां, भारतीयदलेन ह्यः भूटानदेशस्य थिम्फूनगरे क्रीडिते अन्त्यचक्रे बांग्लादेशदलं द्वि-शून्यम् इत्यङ्कान्तरालेन पराजित्य सैफ-सप्तदशान्तर-वर्गीया प्रतिस्पर्धा विजिता।